# 2020

## SANSKRIT — HONOURS

### Paper : SEC-A-1

### (Sanskrit Writing Skill)

### Full Marks : 80

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

1. (a) अधोलिखितेषु ***द्वयोः*** संस्कृतभाषया देवनागरलिप्या च अनुवादः कार्यः। 10×2

(i) There lived in Ujjayinī a king named Tārāpīḍa. He conquered the earth by dint of his power. He had a queen named Vilāsavatī who was the chief of the ladies of the royal harem. They had no child. One day the king went to the apartment of Vilāsavatī and found her weeping.

(ii) There is a beautiful garden. There are many trees, various charming flowers where bees hum sweetly. By the cooing of cuckoos, the spring is there ever present. In the afternoon boys and girls come in the garden and play there. This enhances the beauty of the garden.

(iii) There was a city in which lived a learned but poor Brahmin. His wife was a terrrible lady. Being afraid of her, even a demon that resided in a tree by the doorstep, escaped to the nearest forest. The Brahmin too, left his home in panic and the demon met him on the way.

(b) अधोलिखितेषु ***द्वयोः*** आङ्गलभाषया मातृभाषया वा अनुवादः कार्यः। 10×2

(i) अस्ति कस्मिंश्चित् प्रान्तरे महान् वटपादपः। तत्र हंसकाकौ निवसतः। अथ कदाचिद् ग्रीष्मसमये परिश्रान्तः कश्चिद् पथिकः तत्र तरुतले सुप्तः, क्षणान्तरे तन्मुखाद् वृक्षच्छाया अपगता। तदवलोक्य तद्वृक्षस्थितेन हंसेन कृपया पक्षौ प्रसार्य पुनः तन्मुखे छाया कृता। स पथिको निद्रासुखेन मुखव्यादनं कृतवान्। अथ दुष्टः काकः तस्य मुखे मलत्यागं कृत्वा पलायितः। ततो यावदसौ पथिकः उत्थाय ऊर्ध्वं निरीक्षते तावत् तेन स हंसः दृष्टः। स तमेव वाणेन हतवान्।

(ii) ऋच्यते स्तूयते यया सा ऋक्। तादृशीनामृचां समूह एव ऋग्वेदः। यत्रार्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः। स ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः। तत्र सूक्तं चतुर्विधम्-ऋषिसूक्त-देवतासूक्तच्छन्दःसूक्तार्थसूक्तभेदात्। ऋग्वेदः सोऽयं मण्डलानुवाकवर्गभेदेन अष्टकाध्यायसूक्तभेदेन च द्विधा। बालखिल्यसूक्तानि विहाय सम्पूर्णायामृग्वेदसंहितायां दशमण्डलानि, पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः।

(iii) पुरा अस्मिन् भारतवर्षे उत्तानपादो नाम राजा आसीत्। तस्य द्वे भार्ये आस्ताम् - सुनीतिः सुरुचिश्च। ध्रुवः सुनीतेः पुत्रः सुरुचेः पुत्रः उत्तमश्च अभवताम्। एकदा राजा उत्तानपादः सिंहासने उपविष्ट आसीत्। तद्दृष्ट्वा ध्रुवोऽपि तत्रोपवेशनाय ऐच्छत्। राज्ञी सुरुचिः तं कुमारं तिरस्कृतवती। ध्रुवो गृहं गत्वा सर्वं मात्रे कथितवान्। माता च तं सान्त्वनां दत्तवती। ततः स वनं गतवान् भगवतः तपस्यायै। तत्र स कठोरं तपश्चर्याम् अकरोत् येन हिंस्रपशवोऽपि तं न भाययन्ते स्म।

**2.** अधोलिखितं सन्दर्भं सम्यक् पठित्वा तदन्ते प्रदत्तानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

ततः प्रातः सर्वे यथाभिमतं देशं गताः। एकदा तेन जम्बुकेन सुनिभृतमुक्तम् – सखे मृग! एतस्मिन् वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति। अहं त्वां नीत्वा दर्शयामि। तथा कृते सति मृगः प्रत्यहं शस्यं खादति। क्षेत्रपतिना च तद्दृष्ट्वा पाशस्तत्र नियोजितः। अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत् – को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः?

(a) प्रातः सर्वे कुत्र गताः? 2

(b) शृगालः मृगं सुनिभृतं किमवदत्? 2

(c) मृगस्तदा किमकरोत्? 2

(d) मृगः कथं पाशैर्बद्धोऽभवत्? 2

(e) पाशबद्धो मृगः किमचिन्तयत्? 2

**3.** अधोलिखितयोः ***कस्यचित् एकस्य*** उत्तरं यथानिर्देशं देयम्। 10

(a) जीवनस्य लक्ष्यं निर्देशं कृत्वा पितरं प्रति पत्रमेकं संस्कृतभाषया देवनागरलिप्या च लिख्यताम्।

(b) भवतो ग्रामे कोविड्-१९ इति रोगस्य प्रकोपं विज्ञाप्य प्रतिकरणार्थं किं किं करणीयमिति पृष्ट्वा स्वास्थ्यविभागस्य आधिकारिकं प्रति पत्रमेकं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्।

**4.** अधोलिखितेषु विषय***मेकमवल***म्ब्य न्यूनतया पञ्चाशदधिकाष्टशतशब्दैः संस्कृतभाषया देवनागरलिप्या च प्रबन्धः लिख्यताम्। 20

(a) देशनायकसुभाषचन्द्रः।

(b) संस्कृतस्य इदानीन्तने काले उपयोगिता।

(c) छात्राणां कर्तव्यम्।

———